শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে দ্বিপঞ্চাশং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে দ্বিপঞ্চাশং দশকম্॥

## ব্রহ্মকৃতৱৎসাপহারৱর্ণনম্

অন্যাৱতারনিকরেষ্ৱনিরীক্ষিতং তে
    ভূমাতিরেকমভিৱীক্ষ্য তদাঘমোক্ষে।
ব্রহ্মা পরীক্ষিতুমনাঃ স পরোক্ষভাৱং
    নিন্যেঽথ ৱৎসকগণান্ প্রৱিতত্য মাযাম্॥ **52.1** ॥

ৱৎসানৱীক্ষ্য ৱিৱশে পশুপোৎকরে তা -
    নানেতুকাম ইৱ ধাতৃমতানুৱর্তী।
ৎৱং সামিভুক্তকবলো গতৱাংস্তদানীং
    ভুক্তাংস্তিরোঽধিত সরোজভৱঃ কুমারান্॥ **52.2** ॥

ৱৎসাযিতস্তদনু গোপগণাযিতস্ত্ৱং
    শিক্যাদিভাণ্ডমুরলীগৱলাদিরূপঃ।
প্রাগ্ৱদ্ৱিহৃত্য ৱিপিনেষু চিরায সাযং
    ৎৱং মাযযাঽথ বহুধা ব্রজমাযযাথ॥ **52.3** ॥

ৎৱামেৱ শিক্যগৱলাদিমযং দধানো
    ভূযস্ত্ৱমেৱ পশুৱৎসকবালরূপঃ।
গোরূপিণীভিরপি গোপৱধূমযীভি -
    রাসাদিতোঽসি জননীভিরতিপ্রহর্ষাৎ॥ **52.4** ॥

জীৱং হি কঞ্চিদভিমানৱশাৎস্ৱকীযং
    মৎৱা তনূজ ইতি রাগভরং ৱহন্ত্যঃ।

আত্মানমেৱ তু ভৱন্তমৱাপ্য সূনুং
    প্রীতিং যযুর্ন কিযতীং ৱনিতাশ্চ গাৱঃ॥ **52.5**॥

এৱং প্রতিক্ষণৱিজৃম্ভিতহর্ষভার -
    নিশ্শেষগোপগণলালিতভূরিমূর্তিম্।
ৎৱামগ্রজোঽপি বুবুধে কিল ৱৎসরান্তে
    ব্রহ্মাত্মনোরপি মহান্ যুৱযোর্ৱিশেষঃ॥ **52.6**॥

ৱর্ষাৱধৌ নৱপুরাতনৱৎসপালান্
    দৃষ্টৱা ৱিৱেকমসৃণে দ্রুহিণে ৱিমূঢে।
প্রাদীদৃশঃ প্রতিনৱান্ মকুটাঙ্গদাদি -
    ভূষাংশ্চতুর্ভুজযুজঃ সজলাম্বুদাভান্॥ **52.7**॥

প্রত্যেকমেৱ কমলাপরিলালিতাঙ্গান্
    ভোগীন্দ্রভোগশযনান্ নযনাভিরামান্।
লীলানিমীলিতদৃশঃ সনকাদিযোগি -
    ৱ্যাসেৱিতান্ কমলভূর্ভৱতো দদর্শ॥ **52.8**॥

নারাযণাকৃতিমসঙ্খ্যতমাং নিরীক্ষ্য
    সর্ৱত্র সেৱকমপি স্বমৱেক্ষ্য ধাতা।
মাযানিমগ্নহৃদযো ৱিমুমোহ যাৱ -
    দেকো বভূৱিথ তদা কবলার্ধপাণিঃ॥ **52.9**॥

নশ্যন্মদে তদনু ৱিশ্ৱপতিং মুহুস্ত্ৱাং
    নৎৱা চ নূতৱতি ধাতরি ধাম যাতে।
পোতৈঃ সমং প্রমুদিতৈঃ প্রৱিশন্ নিকেতং
    ৱাতালযাধিপ ৱিভো পরিপাহি রোগাৎ॥ **52.10**॥

॥ ইতি শ্রীমন্নারাযণীযে দ্বিপঞ্চাশং দশকং সমাপ্তম্॥